# Shri Shivashatakam

# શ્રીશિવશતકમ્ ૧

## Document Information

Text title : Shri Shivashatakam 02 04

File name : shivashatakam1.itx

Category : shiva, shataka

Location : doc_shiva

Proofread by : Aruna Narayanan

Description/comments : From stotrArNavaH 02-04

Latest update : July 25, 2021

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

November 22, 2022

*sanskritdocuments.org*

# શ્રીશિવશતકમ્ ૧

શિવં ગૌરીશ્લિષ્ટં સુરવિટપિમૂલસ્થિતમહં
    સુવર્ણાભં પદ્માસનસહિતમર્ધેન્દુશિરસમ્ ।
કુઠારત્રાસાનુગ્રહવરગદાલઙ્કૃતકરં
    ત્રિણેત્રં સંસેવે ગુહગજમુખોત્સઙ્ગમનિશમ્ ॥ ૧॥

મનોભૂસન્દોહાદપિ સુવપુષં મન્દહસિત-
    પ્રભાસ્તોમસ્થેમદ્વિગુણિતમુખામ્ભોજસુષમમ્ ।
વૃષારૂઢં પ્રૌઢામરનિકરકોટીરવિલસ-
    ત્પદદ્વન્દ્વં સેવે પરમશિવમાર્યાસહચરમ્ ॥ ૨॥

શિવં શાણોલ્લીઢસ્ફટિકમણિશોભં શશિકલા-
    શુભોત્તંસં હંસાદૃતપદયુગં શ્યામલગલમ્ ।
ઉમાશ્યામાર્ધાઙ્ગં ભુજગપતિભૂષં સુવપુષં
    જટાજૂટક્રોડભ્રમદમરગઙ્ગં શુભવૃષમ્ ॥ ૩॥

નિરીહં નિર્માયં નિરવધિસુખં નિર્મલતરં
    નિરાસઙ્ગં નીરાગનિયમિનિષેવ્યં નિરુપમમ્ ।
નિરાતઙ્કં નિત્યં નિખિલગુણનિર્મુક્તમગદં
    નિરાધારં નીડં નિખિલજગતાં તદ્ભજ મનઃ ॥ ૪॥

તવ સ્તોતું શમ્ભો ગુણમગણનીયં સુરગણાઃ
    સ્વતોભાતશ્રુત્યાદ્યખિલવચનાર્થા ન કૃતિનઃ ।
મમાસ્મિન્નજ્ઞસ્યાધિકૃતિરહહ ક્વાચ્યુતસરો-
    ભવાપત્યાભ્યામપ્યવિદિતપદામ્ભોજમકુટ ॥ ૫॥

તથાપિ ત્વાં સ્તોતું સપદિ યતતે શર્વ રસના
    મદીયા નેદીયસ્સરસિરુહજન્મપ્રણયિનીમ્ ।
પ્રસાદ્ય પ્રાગ્જન્માચરિતસુકૃતાલેપસરસાં
    નિરાસાય ત્રાસાદ્યખિલવિપદાં મૃત્યુવિજયિન્ ॥ ૬॥

કથં તે વાગ્ગુમ્ભઃ કથમપિ ચ વાણીચરણયોઃ
    પ્રસાદઃ પ્રાચીનવ્રતિજનતપોરાશિસુલભઃ ।
ભવેદિત્થં પ્રશ્નસ્તવ યદિ વદામ્યુત્તરમહં
    ભવત્પાદદ્વન્દ્વસ્મરણમઘહારિન્ હૃદિ ન કિમ્ ॥ ૭॥

તવ ભ્રાન્તા જન્માન્તરકૃતસરૂપોદયજુષઃ-
    પ્રગલ્ભન્તે શમ્ભો પરમસુખસામ્રાજ્યવિમુખાઃ ।
ન વિજ્ઞાતું દ્રષ્ટું ભુવિ કથયિતું શ્રોતુમપિ વા
    જનાઃ સર્વે યત્કિઞ્ચિદપિ મહિમામ્ભોનિધિકણમ્ ॥ ૮॥

અવિદ્યાવૈશદ્યપ્રકટનપરાભૂતમતયો
    વિરિઞ્ચાદીનઞ્ચન્ત્યહહ શિવ સૃષ્ટ્યા ત્વયિ વિભો ।
પ્રપઞ્ચાન્ કિઞ્ચિત્ત્વાં સ્મરણપદવીં ચાપિ ન જડા
    નયન્તિ ત્વાં હિત્વા તરતુ ભવમેષાં કથય કઃ ॥ ૯॥

ન જાનેઽહં શમ્ભો સકૃદપિ ભવન્તં શ્રુતિગિરા-
    મભૂમિં સંસારભ્રમણવિધિના મોહિતમનાઃ ।
અથાપ્યદ્યાસ્તિક્યં મમ બહુ સમીક્ષ્ય પ્રભુમણે
    પ્રસીદ ક્ષિપ્રં મે નિરવધિકકારુણ્યનિલય ॥ ૧૦॥

સ્વકર્માદ્યૈઃ શમ્ભો દુરવગમતામર્થમનસાં
    નરાણાં સર્વેષાં શિવ તવ નિશમ્યૈવ યતયઃ ।
નિરાસઙ્ગાસ્તુઙ્ગં શ્રુતિશિખરિણાં શ ृઙ્ગમભિતો
    ગવેષન્તે ત્વાં તે કલુષધિષણોઽહં ભુવિ કિયાન્ ॥ ૧૧॥

કથઞ્ચિત્ કામારે કલુષમતયઃ કેચન વિભો
    વિભૂતીર્ભાવત્કા વિધિશતમખાદ્યા મૃતિજુષઃ ।
ઉપાસ્યૈવ પ્રાયઃ શિથિલિતમહામોહકણિકા
    ભવન્તં વેદાન્તાધ્વનિ સમધિગન્તું સુકુશલાઃ ॥ ૧૨॥

પુરારે કર્માણિ પ્રતિજનિ શતં પ્રાકૃતજનાઃ-
    શ્રમાત્ કારઙ્કારં કથમપિ ભુવશ્ચાદિવમિમે ।
સમુદ્ભ્રામ્યાપત્યાથ ભુવમપિ વા ક્લેશજલધૌ
    નિમજ્જન્તિ ત્યાગાત્તવ પદસમાલમ્બનવિધેઃ ॥ ૧૩॥

ત્વદાનન્દં લબ્ધું ત્રિપુરહર કર્માધદિમમિદં (ધિકમિદં)

નિદાનં તજ્જ્ઞાત્વાસુકરમિતિ સર્વેઽપિ વિજહુઃ ।
બહુશ્રદ્ધાભક્તિદ્રવિણવિરહાત્તેઽપિ ભવતઃ
પદામ્ભોજં સ્મૃત્વા સકૃદિહ સુખં ભૂરિ દધતે ॥ ૧૪॥

નિષિદ્ધસ્ય જ્ઞાનં ભવતિ વિહિતસ્યાપિ ચ ન હિ
શ્રુતિસ્મૃત્યજ્ઞાનાન્મમ પુનરપીષત્ પશુપતે ।
કથં તત્ર શ્રદ્ધા યતનમપિ વા પ્રત્યુત કૃતિ-
ર્ઘટિષ્યત્યત્યન્તં શરણમહહ ત્વં જડમતેઃ ॥ ૧૫॥

પુલિન્દઃ કિં વિદ્વાનુત વિહિતકર્માચરણવા-
નુતસ્વિદ્વેદાદિપ્રકટિતનિષેધાદુપરતઃ ।
સ તાવદ્ભક્તાનાં પ્રથમપદવીં ત્વત્કરુણયા
પ્રણીતસ્તસ્માદપ્યહમિહ ભવન્તં શિવ ભજે ॥ ૧૬॥

કલાહીનં દીનં કલુષહૃદયં કામસચિવં
શશાઙ્કં નિઃશઙ્કં શિરસિ ચ પરં ગૂઢવપુષમ્ ।
વિધત્સે યત્તસ્માદવિહિતવિધાનપ્રણયિનો
મમાપીશ શ્રીશસ્તુત શરણમેકઃ પશુપતે ॥ ૧૭॥

યયા લોકાઃ શોકાદ્યખિલભવપીડાપરિભવં
સહન્તો વિભ્રાન્તાઃ પુનરપિ પુનઃ ફલ્ગુવિષયે ।
રસભ્રાન્ત્યા શ્વાનો વિગતરુધિરક્રવ્યશકલે
વિમુહ્યન્તીવાસ્થિન્યહહ હર માયાં પશુપતે ॥ ૨૮॥

પ્રસીદ ત્વં પ્રાહ્ણેતનતપનભાનુવ્યતિકર-
સ્ફુટામ્ભોજૌપમ્યં વહતિ હૃદયે મે પશુપતે ।
યથા રૂઢં નાન્યદ્ભવતિ ભવદઙ્ઘ્ર્યમ્બુજમૃતે
તથા ધૂતદ્વૈતપ્રચુરતરદુર્વાસનમિહ ॥ ૧૯॥

નિરાસઙ્ગેઽદ્વૈતે ત્વયિ વિરચિતં શઙ્કર વિભા-
વનીશૈર્બ્રહ્માદ્યૈર્જગદખિલમારોપ્ય કુધિયા ।
મહાસ્વપ્ને સૃષ્ટ્વા ભુજગમિવ ભીત્યાદ્યનુભવાઃ
પ્રલભ્યન્તે લોકૈર્હૃદયગતદુર્વાસનતયા ॥ ૨૦॥

દુરાલોકં લોકૈરવિકલહૃષીકૈર્નિયમિભિઃ
કિયાન્ દ્રષ્ટું શ્રોતું કથયિતુમહં શઙ્કર વિભો ।
ભવન્તં પીયૂષદ્યુતિમમરપીતં ચ પુનર-

પ્યુદીતં કો વાન્યો રસયિતુમધીશોઽત્ર સકલમ્ ॥ ૨૧॥

મૃકણ્ડોઃ સત્પુત્રં ચરમસમયત્રસ્તમનસં-
કૃતાન્તાજ્ઞાચીટીં શિરસિ વિદધાનૈઃ પટુભટૈઃ ।
દ્રુતં સંરક્ષ્યાન્યાનવિતુમિવ ભૂયોઽપિ ચરણં
સમુદ્યમ્યાદ્યાપિ પ્રહતશમનં ભર્ગ જયસિ ॥ ૨૨॥

સુધાદિભ્યઃ શમ્ભો રુચિરતરમામ્નાયજલધેઃ
સમુત્પન્નં નામામૃતમખિલપેયં તવ વિભો ।
પુરારે કાલારે કુસુમવિશિખારે નિયમિનઃ
પિબન્ત્યુર્વ્યાં ભાવજ્વરભરનિરાસપ્રણયિનઃ ॥ ૨૩॥

મહામૂઢઃ કિં વા વિગલતિ દૃગાદીન્દ્રિયગણે
કફાવિદ્ધે કણ્ઠે ચરમપવને ચોજ્જિગમિષૌ ।
વપુઃક્લેશે સત્યપ્યહહ ગહને ચાપ્યવસરે
કરિષ્યત્યદ્યૈવ વ્રજતુ શરણં ભર્ગચરણમ્ ॥ ૨૪॥

સુરાણાં પ્રાથમ્યં વહસિ યદનઙ્ગાહિત વિભો
તતસ્તે દુગ્ધાબ્ધેઃ પ્રથમભવમસ્તુ ધ્રુવમિતિ ।
કરાલં સદ્યોઽપાયયદસુરહન્તા સ ભગવાન્
મહાશ્વેલં તાપગ્લપિતનિખિલસ્વાન્તકમલમ્ ॥ ૨૫॥

શિવત્વાત્તે શમ્ભો ભવદુપનતાનામશિવતા
કુતઃ સર્વજ્ઞત્વાદપિ કુશ(કૃશ)તરાજ્ઞાનમપિ વા ।
મૃડત્વાચ્ચાસૌખ્યં શમનશમનત્વાચ્ચ શમનાત્
ભયં દારિદ્ર્યં વા ધનપતિસખત્વાચ્ચ ભગવન્ ॥ ૨૬॥

ત્વદાખ્યાયામુગ્ર સ્મૃતિમુપગતાયાં વિષમહી-
રુહોંઽહસ્સઙ્ઘાખ્યઃ સપદિ પરિતો મ્લાયતિતરામ્ ।
ગલાગ્રં શ્રિષ્યન્ત્યાં જ્વલતિ સમમામૂલમચિરાત્
રસજ્ઞાં પ્રાપ્તાયામપિ ભુવિ નૃણાં શામ્યતિતરામ્ ॥ ૨૭॥

મયા તે યત્કિઞ્ચિત્ કૃતમપિ સપર્યાદિકરણં
બહુ જ્ઞાત્વા વિપ્રબ્રુવમિમમવાદ્યૈવ કૃપયા ।
કુબેરસ્નિગ્ધ ત્વં કિમવસિ ન ચ સ્માઽઽસ્યગલિતં
ફલં તોયં ધૃત્વા શિરસિ ચ પુલિન્દં વનભુવિ ॥ ૨૮॥

મહત્ત્વં કીદૃક્ તે મદનમથન ક્ષોણિપતયો
    ધનાદ્યં યત્ કિઞ્ચિત્ શતધૃતિમહેન્દ્રપ્રભૃતયઃ ।
પદં સ્વીયં શમ્ભો ભવદુપકૃતાસ્ત્વચ્ચરણયોઃ
    કૃતાસઙ્ગાઃ સન્તઃ સપદિ દદતે મુક્તિમપિ તે ॥ ૨૯॥

ક્રિયાસુ શ્રૌતીષુ સ્મૃતિસમુદિતાસુ ત્વદભિધાં
    ગૃણન્તઃ સેવન્તે શતધૃતિપદં ચ પ્રતિપદમ્ ।
સમુદ્યદ્વૈકલ્યક્ષપણવિધિહેતોઃ શિવ વિભો
    કિમુ ત્વત્સાયુજ્યં સપદિ ભગવન્નામ ભજતઃ ॥ ૩૦॥

દુરાશાન્ધો જીવો જઠરતલમન્ધોરિવ વિશન્
    મહામોહાખ્યસ્ય ભ્રમતિ નતબન્ધો યમરિપો ।
પરિક્રન્દન્નિત્યાઃ સપદિ ભવતો નૈવ કરુણા
    ભવેચ્ચેલ્લોકોઽયં તરતુ કથમાર્તીઃ સુમહતીઃ ॥ ૩૧॥

યદાલમ્બાદમ્બા ત્રિભિરપિ ગુણૈઃ સ્થાવરચરં
    પ્રપઞ્ચં સૃષ્ટ્વાસ્મિન્ પશુસુતકલત્રાદિવશતામ્ ।
પ્રણીય પ્રાયસ્તદ્વિષયગતદુઃખાનુભવતો
    મનુષ્યાદીન્ જન્તૂન્ ગ્લપયતિ સ મેઽસ્ત્વત્ર શરણમ્ ॥ ૩૨॥

ગિરીશ સ્વામિંસ્તે ત્રિગુણગુણિતે દામનિ મહાઽ-
    વિવેકાખ્યે બદ્ધાઃ પશવ ઇવ મર્ત્યાશ્ચ વિષયાન્ ।
તૃણસ્તમ્બાન્ ભુક્ત્વા જહતિ સુખમાત્યન્તિકમહો
    પ્રમત્તા આયત્તાઃ કુધનમદિરોન્મત્તમનસામ્ ॥ ૩૩॥

હૃષીકાણિ પ્રાયો વિષયવશગાનિ પ્રતિપદં
    વિધાય સ્વાન્તસ્સ્થં ગિરિશ મૃગયન્તે જડધિયઃ ।
બહિસ્ત્વામજ્ઞાનસ્તબકિતમહામોહતિમિરાઃ
    સમન્તાદાલમ્બ્ય ત્વહહ ગલચામીકરનયમ્ ॥ ૩૪॥

ઇદં જન્મ બ્રાહ્મં કથમપિ સમાસાદ્ય ભગવન્
    મહામોહૈરેવ વ્યવહિતમનાઃ પશ્ચિમદિને ।
ભવાન્ ધ્યેયો મત્વેત્યનુપદમસૂન્ મુઞ્ચતિ જનઃ
    કદા વા સન્તીર્ણો ભવતિ ભવસિન્ધુર્જનિમતા ॥ ૩૫॥

ત્વદાવિર્ભાવેન ત્રિપુરમથન સ્વાન્તવિષયે
    જરીજૃમ્ભન્તેઽમી શમમુખગુણાઃ સમ્પ્રતિ સતામ્ ।

વિભો શમ્ભો કામપ્રભૃતિરિપવો ધિક્કૃતબલાઃ
　　પલાયન્તે ચિન્તાદ્યખિલપરિવારૈઃ ક્વચિદિમે ॥ ૩૬॥

પિશાચોઽહઙ્કારો હૃદયતરુમાસાદ્ય મમતા-
　　પિશાચીસંશ્લિષ્ટો વિષયરુધિરાન્મોહનિશિ ચ ।
નિપીયેમં જીવં જનિષુ બહુધાદ્યાપિ કલયન્
　　ત્વયિ પ્રાપ્તે ચિત્તં ત્રિપુરહર ધાવત્યહહ સઃ ॥ ૩૭॥

પ્રસાદાત્તે સત્ત્વઃ પ્રભવતિ ગુણઃ શઙ્કર ભવ-
　　ત્યનેનાસ્મિઞ્જીવઃ કથમપિ વિમુક્તઃ પશુપતે ।
અવિદ્યાકારાયા વિગલિતસમીહાખ્યનિગલો
　　હૃષીકૈઃ સ સ્વાન્તૈરમૃતવિષયસ્તોમકબલઃ ॥ ૩૮॥

વિધિર્વા શક્રો વા વિવિધમપિ ભાગ્યં દિશતુ મે
　　મહારોગ્યં વાન્તઃકરણગતમોહસ્તુ ભવતા ।
મહાદેવ ક્ષય્યસ્તિમિરનિકરસ્તિગ્મમહસા
　　નિવાર્યો નિશ્શેષં પિહિતશશિનક્ષત્રમહસા ॥ ૩૯॥

પુરારે કાલારે કુસુમવિશિખારે ત્વદિતરે
　　સુરાઃ સર્વે સ્વર્વાસિન ઇહ સમુદ્ધર્તુમધિનમ્ ।
યદીત્થં જાયન્તે તદિદમમિતધ્વાન્તહરણં
　　કુહૂરાત્ર્યા ખદ્યોતકિરણસહસ્ત્રૈઃ પ્રસૃમરૈઃ ॥ ૪૦॥

મહેશ ત્ર્યક્ષ ત્વચ્ચરણશરણા વીક્ષણકણૈઃ
　　કૃપાસાન્દ્રૈરિચ્છાં પ્રણતજનતાયાઃ ફલવતીમ્ ।
પ્રકુર્વાણાઃ સ્રષ્ટુસ્ત્રિભુવનપતેર્જઙ્ગજયિનો
　　મહીપાલસ્યાપિ પ્રતિભટપટુત્વં વિદધતે ॥ ૪૧॥

અભિવ્યાપ્ય ત્રૈલોક્યમપિ વસતસ્તે શિવ વિભો
　　શિરો ધાતા દ્રષ્ટું કથમપિ સમારુહ્ય ભગવન્ ।
દિવં ક્ષીણાટોપોઽરહયદલઘુત્વં હિ તરસા
　　કુતો વાહઙ્કારી ન ભજતિ પરાભૂતિમધિકાત્ ॥ ૪૨॥

પુરસ્તિસ્રો લક્ષ્યં શરધિરુદધિર્માધવ ઇષુ-
　　ર્મહામેરુશ્ચાપઃ ક્ષિતિરપિ રથઃ સારથિરભૂત્ ।
વિધિર્વેદવ્યૂહો હયવરસમૂહઃ સ ભગવાન્
　　પિનાકી મે ભૂયાત્ સપદિ વિપદાં ભઙ્ગવિધયે ॥ ૪૩॥

પદાન્તે શોભન્તે પરિણતશુભાનાં પશુપતે
 કિરીટાનિ બ્રહ્માદ્યખિલસુમનોબાહુજનુષામ્ ।
વિપદ્ભઙ્ગાયૈવ હ્યયમપિ તવાગ્રે શરણમિ-
 ત્યજસ્રં સાષ્ટાઙ્ગં સદય શતકૃત્વઃ પ્રણમતિ ॥ ૪૪॥

સ્મિતં તે નીહારાચલપરસુતાનાયક વિભો
 શરજ્જ્યોત્સ્નાપૂરપ્રસૃમરમહાપાણ્ડિમસમમ્ ।
અહો સન્તાપઘ્નં શિશિરતરમેકાન્તમનસાં
 કથં વાભ્રવ્યાપિ ત્રિપુરમદહત્ ક્ષિપ્રમહહ ॥ ૪૫॥

વિના યં વા લોકો ગુણિનમવનીપં સ ચ શચી-
 પતિં હસ્તોદસ્તસ્વરુમપિ વિના સોઽપિ ચ વિના ।
વિધિં દૈત્યત્રાસાપનયઘટકં સોઽપિ ન લસે-
 દ્વિના ત્વામીશાનાખિલભુવનજન્માદિકરણે ॥ ૪૬॥

ચરિત્રં તે ચિત્રં પુરહર પવિત્રં નિયમિનાં
 પ્રવેકઃ સત્રાદૌ કલહજનિરુદ્ગાયતિ સદા ।
મહત્યા સઞ્જાતોત્પુલકમુકુલાલીકખચિત-
 સ્વકીયાઙ્ગં બાષ્પસ્તબકિતદૃગમ્ભોજયુગલમ્ ॥ ૪૭॥

પિનાકિન્નદ્યાપિ પ્રકટયસિ કિં વિક્રમરમાં
 ત્વદીયં સ્થાનં મે હૃદયમરયો નિર્દયમિમે ।
સમાક્રમ્યૈધન્તે સરભસહૃષીકાલિપૃતના-
 ગૃહીતપ્રસ્ત્યાયદ્વિષયકબલા હર્ષશબલાઃ ॥ ૪૮॥

ભવદ્ભક્ત્યા શમ્ભો કબલિતમહામોહતિમિર-
 સ્તપસ્વી યં પૂર્વં વિષયસમુદાયં સુખકરમ્ ।
વિજાનીતે સ્મેમં ગરલમધુના તત્ત્રિભુવનં
 સસત્યં ચાસત્યં તદપરમિવાત્માનમપિ ચ ॥ ૪૯॥

દ્વિજોત્તંસશ્રીમદ્ઘનદઘનદામોઘકરુણ
 ત્રિણેત્ર ત્વાં કો વા વિરહયતુ ભાવશ્રમભરઃ ।
દ્વિજન્માપિ ભ્રાન્ત્વા ભુવનમભિતઃ શ્રાન્તહૃદયઃ
 શ્રુતિસ્મૃત્યાદ્યર્થાવગતિનિપુણઃ પ્રાણિષુ મહાન્ ॥ ૫૦॥

વિનાઙ્ઘ્રિં જઙ્ઘાલો દૃશમપિ વિના દર્શનપટુ-

ર્વિના વાચં વક્તા શ્રુતિમપિ વિના શ્રોતૃનિપુણઃ ।
વિના પાણિં સર્વગ્રહણનિપુણો ઘ્રાણરહિતઃ
સમાઘ્રાતા શમ્ભુર્મમ હૃદયસૌધે વિહરતામ્ ॥ ૫૧॥

સુરાણાં સર્વેષાં નિરવધિકમાહાત્મ્યવિષયે
તવ સ્થાણો શમ્ભો ન કિમપિ મનાક્ સંશયપદમ્ ।
યતઃ કાલાનઙ્ગત્રિપુરગરલા દુસ્સહતરાઃ
પરાભૂતાસ્ત્રાતા દ્રુહિણમુખદેવાશ્ચ ભવતા ॥ ૫૨॥

ત્વયા દત્તં તેજઃ સરસિરુહબન્ધુઃ પ્રતિદિનં
ભ્રમન્ મેરોઃ સાનૌ ઘટયતિ પટુત્વં જનદૃશામ્ ।
તતશ્ચન્દ્રસ્તારાગણહુતભુજૌ રાત્રિષુ મહો
ગૃહીત્વા લોકાનાં ત્રયમપિ સચક્ષુર્વિદધતે ॥ ૫૩॥

પદામ્ભોજં શમ્ભો યદિ મનસિ મે પુણ્યપુરુષા-
ધિરૂઢપ્રૌઢિમ્ના કિમુ વિભવલાભેન કરયોઃ ।
સકૃત્કિઞ્ચિન્મુદ્રા યદિ ચ વિષયા સે નયનયો-
શ્ચિદા(તા) કિં શૂલી ચેન્મમ કિમુ વિવસ્વત્સુતજયૈઃ ॥ ૫૪॥

અહમ્ભાવઃ શમ્ભો યદિ સુમનસાં ત્વત્પરતરા
ઇતિ બ્રહ્માદીનાં વયમિહ મૃકણ્ડોઃ પ્રિયસુતમ્ ।
રરક્ષુઃ કિં કાલાત્ કુસુમવિશિખં વા કિમજયન્
પુરસ્તિસ્રો હાસૈર્યુધિ કિમહરન્નૈવ ભગવન્ ॥ ૫૫॥

સ્મિતેન દ્વૈગુણ્યં ગિરિશ તવ શોભા શ્રિતવતી
દધાના દેવાદ્યૈર્મથિતકલશામ્ભોધિજનુષામ્ ।
શ્રિયં ડિણ્ડીરાણામપિ ઝટિતિ સાક્ષાન્નયતુ મે
પુરાજાતેદાનીન્તનદુરિતપઙ્કં પશુપતે ॥ ૫૬॥

તવૈવેચ્છા હેતુઃ સકલકરણે સર્વહરણે
સમસ્તત્રાણે વા યદભજત સર્વં ચ કરણમ્ ।
પુરાં દાહે શૈલદ્રઢિમગુણભાજામપિ શુચિ-
સ્મિતં ત્યક્ત્વેતરદિષુમુખસ્યેડ્યપદવીમ્ ॥ ૫૭॥

મનોઽરણ્યે ભ્રાન્તાઃ પ્રસૃમરરજોધૂસરતરાઃ
પરિત્રસ્યજ્જીવા વિગલિતવિવેકાઃ પૃથુતરાઃ ।
મહેનોમત્તેભા ભવથ વિજિતાઃ સમ્પ્રતિ મયા

યતો મે પઞ્ચાસ્યો હૃદિ વિહરતે પિઙ્ગનયનઃ ॥ ૫૮॥

કૃપાવાનપ્યુગ્રો ધનદધનદો વીતવસનઃ
સુમેષુપ્રદ્વેષી વપુષિ ધૃતયોષિચ્છુભગુણઃ ।
મહાસ્તેયી શુદ્ધઃ શશિવિધિશિરોભૂષિતવપુઃ
શિવ ત્વદ્વૈરૂપ્યં સુખમિહ પરત્રાપિ દિશતુ ॥ ૫૯॥

પુરા જન્મસ્વેનઃ કૃતમનુભવામીહ જનને
વિદિત્વાપિ પ્રાયઃ પિહિત ઇવ પાપાનિ કુરુતે ।
યથાયં મે ભિન્તાં દ્રુતતરમહન્તાં સવિષયા-
મશાન્તાં સંહન્તા સ સપદિ પુરાણામપિ વિભુઃ ॥ ૬૦॥

શરઃ શેતે સિન્ધૌ શરધિરપિ ભક્તેન તરસા
નિપીતશ્ચાપાગ્રે વસતિ સુમનોવૃન્દમખિલમ્ ।
શતાઙ્ગે સન્દોહો નરતરુમુખાનામસુમતાં
વસત્યાસ્તાં યસ્ય ત્રિપુરવિજયી મે સ હૃદયે ॥ ૬૧॥

સહાયીકૃત્યાસ્માન્ કુસુમશરહા ચાટ્ટહસિતૈ-
રસૌ ભસ્મીચક્રે ત્રયમપિ પુરાણામિતિ હરિઃ ।
હ્રિયા શેતે નિદ્રાણ ઇવ નિગમાન્તાભિનિરતો
વિરક્તો વા બ્રહ્મા વિદધતિ સુરાઃ શૈલવસતિમ્ ॥ ૬૨॥

મનોજન્માઽનઙ્ગાઃ કૃત ઇતિ લલાટાક્ષ ભવતા
દિવા ગચ્છન્ સિન્ધૌ નિશિ ચરતિ ભીત્યા સ્મરસખઃ ।
નભસ્યેવામ્ભોજં પયસિ તદિષુર્મજ્જતિતરાં
સમૂહો મેર્વગ્રે પરિચરતિ તત્પ્રેરણકૃતામ્ ॥ ૬૩॥

ગજસ્કન્ધારૂઢો હરિરપિ વૃષારૂઢ નમતિ
પ્રણૌતિ શ્રીદોઽપિ પ્રવણહૃદયો દિક્પટવર ।
તપસ્વી નિધ્યાયત્યપિ વિધિશિરશ્છેદનપટો
મહત્ત્વં કો જ્ઞાસ્યત્યહહ ભગવન્નીદૃશમિતિ ॥ ૬૪॥

મહાત્માનઃ શમ્ભો તવ ચરણદાસાઃ કૃતદિવા-
કરાપત્યાનીકિન્યધિપમકુટીભઙ્ગવિધયઃ ।
ન માં દાસં ત્યક્ષ્યન્ત્યશરણશરણ્યા ન ચ તથા
યદિ પ્રાયસ્તેઽપિ શ્રુતિરપિ ભવદ્ભાગનૃતગીઃ ॥ ૬૫॥

અધીતા નામ્નાયાઃ સકૃદપિ તદર્થા ન વિદિતા
　　ન કર્માણિ સ્વીયાન્યપિ વિરચિતાનિ ક્ષિતિતલે ।
તથાપ્યન્તે શમ્ભો મનુજપશુનોચ્ચાર્ય ભગવન્
　　તવાખ્યામુત્તીર્ણો ભવસરિદધીશો ભવતિ હિ ॥ ૬૬॥

અહો પઞ્ચાસ્ય ત્વં કથમિભમુખં લાલયસિ વા
　　પિશાચાનાં નાથ ત્વમવસિ કુમારં કથમિવ ।
શ્મશાનાવાસી ત્વં નિયમિજનતાં પાવયસિ ચ
　　પ્રપન્નાનાં કામાન્ વિતરસિ કથં કામવિજયિન્ ॥ ૬૭॥

તપસ્તપ્ત્વા ઘોરં ચિરમસુકરં ભૂધરસુતા
　　મહાન્તં ભર્તારં રમયિતુમહો ગોત્રવિકલમ્ ।
અતાતં તં સ્થાણું સ્થવિરતરદોષાકરધરં
　　ભવન્તં સમ્પ્રાપ્તા કથમિહ ભુજઙ્ગૈર્વલયિતમ્ ॥ ૬૮॥

વિરિઞ્ચાદ્યાઃ સર્વે હરસદૃશતાં।વાઞ્છથ યદિ
　　પ્રકામં દુગ્ધાબ્ધિં પુનરપિ વિમથ્યાદ્ય પિબત ।
મહાશ્વેલં ચન્દ્રં ધરત ભજતાપીષદુપમા-
　　શ્રિયં નો ચેત્ ક્વાસૌ ક્વ નુ ખલુ ભવન્તઃ પશુસમાઃ ॥ ૬૯॥

તવોપાન્તે શમ્ભો સરસિરુહપીઠોઽનૃતમુખઃ
　　શિરોદેશાલોકે સ્વયમનુભવન્ ગર્હણદશામ્ ।
અનર્હત્વં લોકેષ્વપિ ભજતિ કો વા ધુરિ સતાં
　　મૃષાવાદી સૌખ્યં ક્વ નુ ભજતુ વેદાન્તવિદપિ ॥ ૭૦॥

ભુજઙ્ગાલઙ્કારામ્બુજભવશિરોમણ્ડિતતનો
　　કપાલિન્નેકોક્ષાશ્રય ગરલપાયિન્ સુમનસામ્ ।
પ્રણેતારસ્તે ત્વાં શરણમુપસઙ્ગમ્ય ચ દિશા-
　　મધીશત્વં પ્રાપ્તા જગતિ વિજયન્તે હરિમુખાઃ ॥ ૭૧॥

ગિરીશ ત્વજ્જાયાવદનસમતાભાવનભવ-
　　ન્મનશ્શલ્યસ્તુલ્યાધિકવિરહિતાહાનિજરુજઃ ।
સુધાંશુઃ સૌરીભિર્દ્યુત્રિભિરરુણાભિર્હૃદિ કૃત
　　પ્રતાપોત્થં લક્ષ્માવહતિ હરિણાધીશ કપટાત્ ॥ ૭૨॥

ચિરાધીતામ્નાયશ્રવણમનનાદ્યૈરુપચિતૈ-
　　ર્ભવજ્જ્ઞાનૈઃ શમ્ભો વિઘટિતતમઃસત્ત્વરજસામ્ ।

મુનીનાં સન્દર્શઃ કથમિતિ ભવેન્મે જડમતેઃ
 પ્રસીદાદાયાદ્ય પ્રણતિમસકૃન્મે પશુપતે ॥ ૭૩॥

શરીરં કલ્પાન્તસ્થમિતિ પરમાત્માનમિતિ ચ (પરમાત્મેતિ ચ મુધા)
 પ્રવિજ્ઞાયાપત્યાદ્યખિલમમતાબન્ધયમિતાઃ ।
મનોરાજ્યં જીવાઃ પ્રતિપદવિપત્સઙ્કુલહૃદઃ
 શિવ ત્વાં સેવન્તે સકૃદપિ ન ચાહો યમરિપો ॥ ૭૪॥

પુરા દેહં ચાત્મેત્યુપચયદશાયાં પશુપતે
 શરીરં તત્પશ્ચાદપચયદશાયાં વિગણયન્ ।
અપીષત્તસ્મિંશ્ચાધ્યસનમધુનાપ્યુજ્ઝતિ યયા
 ન ચાયં માયાં તાં પરિહર સુખં પ્રાપય ચ મામ્ ॥ ૫॥

ત્વયા શમ્ભો ભક્તાઃ શમનદમન પ્રાકૃતગુણૈ-
 ર્વિમુક્તા ભાસન્તે ત્વમપિ ભગવન્ રાજસિતરામ્ ।
વિના (સઙ્ગં) સર્વાન્નાનાવિધબહુલસઙ્કલ્પરહિતૈઃ
 સદા તૈરાપન્નાર્તિહર ઇતિ ચાત્મા વિભુરિતિ ॥ ૭૬॥

શ્રુતીનાં તાત્પર્યં પુરહર ભવન્તં નૃપશવઃ
 પરિજ્ઞાતું ભક્ત્યૌપનિષદવિચારૌ હિ કરણમ્ ।
તથા સત્યજ્ઞાનાન્નયમુખમહાશાસ્ત્રનિચયં
 મ્રિયન્તેઽધીયાના વિદધતિ ચ કર્માણ્યપિ સદા ॥ ૭૭॥

ન કર્તું કિઞ્ચિદ્વા વિહિતમપિ કર્મ પ્રભુરહં
 સમસ્તસ્વાધ્યાયાધ્યયનતદનુષ્ઠાનવિષયે ।
કિયાન્ કિઞ્ચિત્ કિઞ્ચિત્ સકૃદપિ તથાપીશ્વર વિભો
 ત્વદાખ્યાં સઞ્જલ્પામ્યથ ભવદધીનં મદવનમ્ ॥ ૭૮॥

કલત્રાપત્યાભ્યાં સ્વજનસમવાયેન ચ મુહુ-
 ર્જ્વારાદ્યૈ રોગૈશ્ચ વ્યથિતમનસો દુર્ગતમણેઃ ।
ઋતે ત્વાં મર્ત્યસ્યાઃ ક ઇહ શરણં યક્ષનૃપતિ- (મર્ત્યસ્ય આઃ ઇતિ ચ્છેદઃ ।)
 પ્રિયાસ્તાપસ્મારાસુર શમિતવૈવસ્વતમદ ॥ ૭૯॥

અકુર્વન્ સત્કર્માવિહિતમપિ કુર્વન્નનુપદં
 સમુદ્યદ્દારિદ્ર્યાન્તકભયનિરાસૈકહૃદય ।
કથઙ્કારં શમ્ભો તવ ચરણદાસોઽત્ર ભગવન્
 ભવિષ્યામિ ત્વં વેત્સ્યહમપિ કુપાવત્પરિબૃઢ ॥ ૮૦॥

મહાઘોરઃ કાલઃ કટુરટિતવાચાટિતહરિ-
    દ્ભટવ્યૂહાટોપપ્રકટિતનિજાટીકન ઇહ ।
કથઙ્કારં પશ્યેત્ પશુમપિ દૃશોરગ્ચલરુચા
    મૃકણ્ડૂત્પન્નત્રાયક ધૃતિમિતિ પ્રાપ્ય વિહરે ॥ ૮૧॥

કુટુમ્બી પાર્વત્યા ગુહગજમુખાભ્યાં તનયવાન્
    ભુજઙ્ગૈર્ભૂષાવાન્ સિતમણિકિરીટીન્દુકલયા ।
ભવેન્મે જઙ્ઘાલો ધવલવૃષભેણાન્તકજય-
    શ્રિયાયુષ્માન્ સોઽયં યમભયનિરાસાય ભગવાન્ ॥ ૮૨॥

પુરા મારમ્મારં જનનમતિમાત્રં શ્રિતવતા
    મયા કિં કિં પૂર્વં કૃતમિતિ ન જાને યમરિપો ।
ઇદાનીં વારભ્યામૃતરુચિકલોત્તંસ ભગવન્
    ભવત્પાદામ્ભોજસ્મરણનિપુણં માં વિરચય ॥ ૮૩॥

યથાર્હં વા ચિત્તે યમરિપુમનારાધ્ય કુમતે
    મહાસંસારાબ્ધિભ્રમણપરિખિન્ન ક્ષણમપિ ।
કિમર્થં યાગં વા સતતમુપવાસાદિનિયમં
    કરોષિ ગ્રાવાગ્રે વિપિનભુવિ વેશ્મન્યપિ ચ વા ॥ ૮૪॥

સુરાપં બ્રહ્મઘ્નં ગુરુજનકલત્રસ્પૃશમપિ
    પ્રકામં સ્વર્ણસ્તેયિનમપિ સ્વર્ણં ત્વમથ વા ।
યતશ્ચાણ્ડાલં વા નયસિ હર નિર્વાણપદવીં
    સમાલમ્બે સામ્બાવિરતમવિલમ્બં યમરિપો ॥ ૮૫॥

જગત્સંહારિન્ સંહર મમ પુરાણ્યઘ કૃપયા
    (તથા)ન્તે સંહર્તું હ્રિયમતિતરાં મા ગમ ઇહ ।
મહાકામક્રોધપ્રભૃતિપરિપૂર્ણં ત્રયમતઃ
    પુરાણાં કિં ભસ્મપ્રચયમકરોર્નાટ્ટહસિતૈઃ ॥ ૮૬॥

ચરિત્રં શ્રોત્રાભ્યાં ત્રિપુરહર પીત્વાહમનિશં
    ન ચાલમ્બે સામ્બ શ્રુતિચયપુરાણસ્મૃતિગતમ્ ।
યતો ગઙ્ગાચન્દ્રોરગભસિતચર્માબ્જજશિર-
    સ્સમાવેશોઽયં તે વદતિ મહિમાનં ગુરુતરમ્ ॥ ૮૭॥

પ્રયાણારમ્ભેષુ ત્રિપુરહર મે પ્રાણમરુતાં

ભજન્તાં કર્ણૌ ત્વદ્વૃષભગલઘણ્ટામણિરવાઃ ।
કૃતાન્તપ્રાગ્ભાગપ્રસૃમરવિનર્દદ્ભટઘટા-
પિશાચાનામુચ્ચાટનપટુતરશ્રૌતમનવઃ ॥ ૮૮॥

નિજાવાસં શૈલં ભુજપરિઘદણ્ડૈશ્ચલયતઃ
પુરા પૌલસ્ત્યસ્ય સ્તુતિભિરમિતૈઃ સામભિરપિ ।
સ્વયં તુષ્ટસ્તસ્મૈ પ્રમથગણવર્યત્વમદિશો
જવાત્ત્વં કારુણ્યાન્મમ નિરપરાધસ્ય કિમુત ॥ ૮૯॥

અનારાધ્યેષત્ત્વાં કુજનિષુ પુરાણે યમરિપો
કલત્રેણાપીહાધિકમવમતઃ કિં નુ કુરુતામ્ ।
ઇતિ ક્રન્દત્યસ્મિન્નનતિસુલભાં દીર્ઘકરુણાં
નિવેશ્ય ત્વં ત્રાયસ્વ યમભયતો દુર્ગતિભયાત્ ॥ ૯૦॥

ભવદ્ભક્તિં ત્યક્ત્વા ભવભયનિરાસપ્રણયિનીં
જડાઃ શમ્ભો કુમ્ભોદ્ભવશમધનોદ્ગીતમહિમન્ ।
ક્રતું ભૂયો ભૂયો જનિમૃતિનિદાનં વિદધતે
ભવદ્ભક્તિં ત્યક્ત્વા ભવભયનિરાસપ્રણાયિનીમ્ ॥ ૯૧॥

સ્મરારે સક્લેશં ગુરુજનમુખાદાગમમુખાઃ ।
અધીત્યેમે વિદ્યા બત કુધનિનાં કુટ્ટિમતલે
કુટુમ્બત્રાણાય પ્રકટિતરદા બિભ્રતિશુચમ્ ॥ ૯૨॥

શ્રુતીનાં તાત્પર્યં શિવ તવ મહિમ્નીતિ કતિચિત્
વિદિત્વાપિ ત્વામીષદપિ દધતે નૈવ મનસિ ।
ઇતિ ત્વં મા કુપ્યેસ્ત્રિપુરહર મે યાતિ સમતાં (?)
પરિજ્ઞાયાખ્યાન્તે જડમતિરહં સોઽપિ કથયે ॥ ૯૩॥

ભવદ્ભક્તિર્હ્યેકા યદિ દૃઢતરા સામ્બ ભગવન્
ભવામ્ભોધિં તર્તું કિમિહ કરણૈશ્ચાપિ બહુભિઃ ।
મહાદારિદ્ર્યાબ્ધિં બહુલદુરિતક્ષ્વેલકલિલં
પરિજ્ઞાય પ્રાયસ્તવ ચરણમેવર્ચ્છતિ મનઃ ॥ ૯૪॥

સુષુપ્તૌ સ્વપ્ને વા શિવ તવ ચ જાગ્રત્યહમિહ
બ્રવીમ્યુચ્ચૈર્નામ પ્રશમસમુપેતૈર્મુનિગણૈઃ ।
પ્રગીતં સર્વાઘક્ષરણકરણં સઙ્ગરતલે
જિતારાતેર્ભેરીનિનદમિવ ધાત્રીબલરિપોઃ ॥ ૯૫॥

સુતૌ તાવુત્સઙ્ગે ગુહગજમુખાખ્યૌ વપુષિ ચ
પ્રિયાં ગૌરીં ગઙ્ગામપિ શિરસિ પાર્શ્વે પરિચરાન્ ।
વિધાયાતિસ્નિગ્ધં શુભવૃષભમારુહ્ય ભગવાન્
પિનાકી રક્ષાયૈ મમ ભવતુ ભીતસ્ય યમતઃ ॥ ૯૬॥

જગન્નાથશ્રીશપ્રભૃતિસુરસેવ્ય ત્રિપુરજિત્
સ્મરારે કાલારે શ્વશુરમખહારિન્ પશુપતે ।
ગજારે ભૂતેશ પ્રમથગણનાથાદ્ય ભગવન્
ઇતીહ ક્રન્દન્તં પરમકૃપયા પાલય વિભો ॥ ૯૭॥

સુધાભાનૂત્તંસસ્મિતમુખશરચ્ચન્દ્રવદન
પ્રણમ્રાપદ્ભઙ્ગપ્રવણહૃદયામ્ભોજનયન ।
મૃડ શ્રીશ સ્નિગ્ધાલિકનયન શુભ્રાઙ્ગ ભગવન્
ઇતીહ ક્રન્દન્તં પરમકૃપયા પાલય વિભો ॥ ૯૮॥

નગાધીશ ત્ર્યક્ષાખિલશુભદ ગઙ્ગાધર વિભો
શિવ ક્ષ્વેલગ્રીવ દ્યુમણિશશભૃદ્વહ્નિનયન ।
મહાદેવ સ્વચ્છસ્ફટિકમણિસચ્છાય ભગવન્
ઇતીહ ક્રન્દન્તં પરમકૃપયા પાલય વિભો ॥ ૯૯॥

નિરાસઙ્ગ શ્રીમન્ નિરવધિકકારુણ્યનિલય
પ્રણામપ્રીતાન્તઃકરણમુનિવૃન્દૈકશરણ ।
વૃષારૂઢ પ્રૌઢપ્રમથગણનાથાદ્ય ભગવન્
ઇતીહ ક્રન્દન્તં પરમકૃપયા પાલય વિભો ॥ ૧૦૦॥

ભૂયોભૂયઃ શરણં ભૂતેશોઽસૌ ભવાબ્ધિમગ્નસ્ય ।
અવલમ્બહીનમનસો હા હેતિ ક્રોશતો મમેદાનીમ્ ॥ ૧૦૧॥

દુર્ગાધીશ મમેદં દૌર્ગત્યં દૂરતો નિરસ્યૈવ ।
તવ નામકીર્તનં મે તારકમેકં સદા દિશાનન્દમ્ ॥ ૧૦૨॥

સહજમહારાજપુરગ્રામનિવાસી વિવેકિમૂર્ધન્યઃ ।
શ્રીવીરરાઘવાખ્યઃ સઙ્ખ્યાવાન્ સ્તોત્રમેતદતનિષ્ટ ॥ ૧૦૩॥

॥ ઇતિ શ્રીશિવશતકં સમ્પૂર્ણમ્ ॥

Proofread by Aruna Narayanan

*Shri Shivashatakam*

pdf was typeset on November 22, 2022

Please send corrections to *sanskrit@cheerful.com*